तृपन्नदेवानाञ्च वैकारिकत्वमिति" राघवभट्टेन व्याख्यातम्। "वैकारिका दिगाद्याश्च चन्द्रश्चैकादश स्मृताः। इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तिः। तथा च श्रोत्रस्य दिक्, त्वचो वातः, नेत्रस्य अर्कः, रसनायाः वरुणः, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्निः, हस्तस्य इन्द्रः, पादस्य उपेन्द्रः, पायोः मित्रः, उपस्थस्य (कः) प्रजापतिः, मनसः चन्द्रः, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः। "ईश्वरं भास्करे विद्यादुमां विद्यान्निशाकरे। स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः। गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते। शनैश्चरे यमं विद्याद्राहोः कालं तथैव च। चित्रगुप्तोऽधिपः केतोरित्येते ग्रहदेवताः" इति (मत्स्यपुरा०) उक्ता ग्रहाणामधिदेवाः। एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यवह्रियन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते। अधिदेवताप्यत्रैव। "आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवता" इति मत्स्यपु०। "शशाङ्कमूर्त्तेरधिदेवताकृतिरिति" भट्टिः। चन्द्राधिदेवता उमा।

**अधिदैवत** न० अधिष्ठातृ दैवतम् प्रा०स०। अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निप्रत्यधिदैवतमिति" "विचिन्त्यो साधिदैवत"मिति च विष्णुध०पु०। दैवते विभक्त्यर्थे अव्ययीभावः। दैवतमधिकृत्येत्यर्थे अव्य०। "अथाधिदैवतम् आदित्यो वा" इति छान्दो० उ० "इत्यधिदैवतमिति वृ०उ०"। अधिदैवमप्यत्र अव्य०। "अधिदैवं किमुच्यते इति" गीता।

**अधिनाथ** पु० अधिको नाथः प्रा०स०। अधीश्वरे। "तत्राधिनाथमधिकृत्य दिवस्तथासाविति" नैष०।

**अधिनाय** पु० अधिनीयते वायुना गन्धाधारसूक्ष्मांशनयनद्वारा तत्तत्स्थानं ह्रियतेऽसौ अधि+नी—घञ्। गन्धे।

**अधिप** पु० अधिपाति अधि+पा—क। प्रभौ ईश्वरे। "अथ प्रजानामधिपः प्रभाते" इति रघुः। "श्रियः कुरूणामधिपस्येति" भार०।

**अधिपति** पु० अधिकः पतिः, अधि+पा—डति वा। ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुतिः। "सर्व्वस्याधिपतिर्हि सः" इति मनुः। "ततो भुजङ्गाधिपतेः फणाग्रैरिति" कुमा०। पत्यन्तत्वात् भावादौ यक् आधिपत्यम्। अत्यन्तैश्वर्य्ये न०। "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा०। सपूर्व्वपदकत्वात् स्त्रियां ङीष् नश्चान्तादेशः। "विष्टम्भिनी दिशामधिपत्नीमिति यजु० १४,५, अधिपत्नीं स्वामिनीमिति" दीपः।

**अधिपा** त्रि० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "स्वर्यद्दश्मन्नधिपा उ अन्धोऽभि" ऋ०७,८८,२।

**अधिपु(पू)रुष** पु० अधिकः उत्तमः पु(पू)रुषः प्रा०स०। परमेश्वरे। पु(पू)रुषे विभ० अव्ययी०। पु(पू)रुषमधिकृत्येत्यर्थे अव्य०। [बहुप्रजायां स्त्री।

**अधिप्रज** त्रि० अधिका प्रजा यस्य। बहुप्रजायुक्ते। प्रा०स०।

**अधिभू** पु० अभिभवति स्वामीभवति स्वामर्थ्येऽत्वाधिः अधि+भू—क्विप्। प्रभौ।

**अधिभूत** अव्य० भूतेषु विभ० अव्ययी०। भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यत" इत्यर्जुनप्रश्ने "अधिभूतं क्षरो भाव" इति भगवदुत्तरम् इति गीता। "भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधरः। अधिभूते भवः अनुशतिका० द्विपदवृद्धिः आधिभौतिकम्। भूतान्यधिकृत्य जाते दुःखादौ त्रि०।

**अधिभोजन** न० अधिकमत्यन्तं भोजनम् प्रा०स०। अत्यन्तभोजने। भोजनं निरुक्ते धननामसु पठितम् अधिकं धनं मूल्यं यत्र। अतिमूल्यलभ्ये वस्तुनि त्रि०। "दश वस्त्राधिभोजना इति ऋ०६,४७,२३ अधिभोजना अधिकं धनं मूल्यं येषां तादृशानि दश वस्त्राणीति भाष्यम्।

**अधिमन्थ** पु० अधिकं मथ्यतेऽनेन अधि+मन्थ—करणे घञ्। "उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा। शिरसोऽर्द्धं तु तं विद्यादधिमन्थं स्वलक्षणैः" इत्युक्ते अरणिकाष्ठमन्थनावयवभेदे।

**अधिमांस** न० अधिकं मांसमत्र। "विस्तीर्णं मृदु बहुलं यकृत्प्रकारं श्यावं वा तदधिमांसजार्म विद्यादिति" वैद्यकोक्ते रोगभेदे।

**अधिमांसक** पु० अधिको मांसो यत्र ब० कप्। "हनुस्थे पश्चिमे दन्ते महाशोथो महारुजः। लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसक" इति वैद्यकोक्ते दन्तरोगविशेषे।

**अधिमात्र** त्रि० अधिका मात्रा यस्य, अधिकं प्रमाणमस्य मात्रच् वा। अधिकप्रमाणे।

**अधिमास** पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मासः प्रा०स०। मलमासे "असंक्रान्तमासोऽधिमासो निरुक्त" इतिस्मृत्युक्तो रविसंक्रान्तिवर्जितो मासोऽधिमासः। तथा हि "मीनादिस्थो रविर्येषामारम्भः प्रथमे क्षणे। ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भः स चैत्रः एवं मेषस्थरवारब्धो वैशाख